# Shri Minakshi Shodashopachara Stuti

# શ્રીમીનાક્ષીષોડશોપચારસ્તુતિઃ

## Document Information

Text title : Shri Minakshi Shodashopachara Stuti

File name : mInAkShIShoDashopachArastutiH.itx

Category : devii, mInAkShI, pUjA, ShoDasha, stuti

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : Minakshi stutimanjari and Halasya Mahatmyam edited by by SV Radhakrishna Sastri

Latest update : May 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2023

*sanskritdocuments.org*

# શ્રીમીનાક્ષીષોડશોપચારસ્તુતિઃ

ઇક્ષુકોદણ્ડ પુષ્પેષુ પાશાઙ્કુશકરોજ્જ્વલામ્ ।
ઉદ્યત્સૂર્યનિભાં વન્દે મહાત્રિપુરસુન્દરીમ્ ॥ ૧॥

શ્રીમત્સુન્દરનાથસ્ય દેવીં શફરલોચનામ્ ।
કલયે હૃદયે નિત્યં કદમ્બવનવાસિનીમ્ ॥ ૨॥

બાલાર્કારુણપદ્મપીઠનિલયાં વામાદિશક્ત્યાવૃતાં
એલાગન્ધિ સુકુન્તલાં દ્વિનયનાં હેમામ્બરાલઙ્કૃતામ્ ।
વામે લમ્બિત દોર્લતાં સુચરણાં દક્ષેધૃતેન્દીવરાં
શ્યામાભાં શરદિન્દુચારુવદનાં વન્દે સુમીનેક્ષણામ્ ॥ ૩॥

આગચ્છ વરદે દેવિ સર્વસમ્પત્પ્રદાયિનિ ।
પૂજાં ગૃહાણ સુમુખિ નમસ્તે શઙ્કરપ્રિયે ॥ ૪॥

શ્રીમીનાક્ષિ મહાભાગે રક્ષાર્થં મમ સર્વદા ।
આવાહયામ્યહં દેવિ સર્વકામાર્થસિદ્ધયે ॥ ૫॥

અનેકરત્નસંયુક્તં નાનામણિ ગણાન્વિતમ્ ।
કાર્તસ્વરમયં દિવ્યમાસનં પ્રતિગૃહ્યતામ્ ॥ ૬॥

ગઙ્ગાદિ સર્વતીર્થેભ્યો મયા પ્રાર્થનયાઽઽહૃતમ્ ।
તોયમેતત્સુખસ્પર્શં પાદ્યાર્થં પ્રતિગૃહ્યતામ્ ॥ ૭॥

નિધીનાં સર્વરત્નાનાં ત્વમનર્ઘ્યગુણા હ્યસિ ।
સિંહાસન સ્થિતે દેવિ ગૃહાણાર્ઘ્યં નમોઽસ્તુ તે ॥ ૮॥

કર્પૂરેણ સુગન્ધેન સુરભિ સ્વાદુ શીતલમ્ ।
તોયમાચમનીયાર્થં દેવિ ત્વં પ્રતિગૃહ્યતામ્ ॥ ૯॥

મન્દાકિન્યાઃ સમાનીતૈઃ હેમામ્ભોરુહ વાસિતૈઃ ।
સ્નાનં કુરુષ્વ દેવેશિ સલિલૈશ્ચ સુગન્ધિભિઃ ॥ ૧૦॥

પટ્ટકૂલયુતં દેવિ કઞ્ચુકેન સમન્વિતમ્ ।
પરિદેહિ કૃપાં કૃત્વા સર્વસમ્પત્પ્રદાયિનિ ॥ ૧૧॥

સ્વર્ણસૂત્રમયં દિવ્યં બ્રહ્મણા નિર્મિતં પુરા ।
ઉપવીતં મયા દત્તં ગૃહાણ પરમેશ્વરિ ॥ ૧૨॥

શ્રીકણ્ઠચન્દનં દિવ્યં ગન્ધાઢ્યં સુમનોહરમ્ ।
વિલેપનં ચ દેવેશિ ચન્દનં પ્રતિગૃહ્યતામ્ ॥ ૧૩॥

હરિદ્રાં કુઙ્કુમં ચૈવ સિન્દૂરં કજ્જલં તથા ।
સૌભાગ્યદ્રવ્યસંયુક્તં ગૃહાણ પરમેશ્વરિ ॥ ૧૪॥

અક્ષતાન્નિર્મલાન્શુદ્ધાન્ મુક્તામણિ સમન્વિતાન્ ।
ગૃહાણેમાન્ મહાદેવિ દેહિ મે નિર્મલાં ધિયમ્ ॥ ૧૫॥

માઙ્ગલ્ય મણિ સંયુક્તં મુક્તાફલસમન્વિતમ્ ।
દત્તં મઙ્ગલ સૂત્રં તે ગૃહાણ શિવવલ્લભે ॥ ૧૬॥

રત્નતાટઙ્કકેયૂર હાર કઙ્કણમણ્ડિતે ।
ભૂષણં ગૃહ્યતાં દેવિ નમસ્તે પાણ્ડ્યનન્દિનિ ॥ ૧૭॥

જાજી પુન્નાગમન્દાર કેતકીચમ્પકાનિ ચ ।
પુષ્પાણિ તવ પૂજાર્થમર્પયામિ સદા શિવે ॥ ૧૮॥

ઇતિ શ્રીમીનાક્ષીષોડશોપચારસ્તુતિઃ સમાપ્તા ।

Proofread by Rajesh Thyagarajan

*Shri Minakshi Shodashopachara Stuti*

pdf was typeset on May 23, 2023

Please send corrections to *sanskrit@cheerful.com*